Roll No. 1561[redacted]

SET / सेट : **D**

Serial Number
↓
30626640

**102512**

| | |
|---|---|
| Total Printed Pages : 8 | हाईस्कूल मुख्य परीक्षा वर्ष - 2025 |
| Total Questions : 23 | High School Examination (Main) - 2025 |
| Time : 3 Hours | संस्कृत |
| Maximum Marks : 75 | SANSKRIT |

www.rajeshsir.co.in

**निर्देशा :**

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।

(iii) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि।

**1 प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयत् –** 1×6=6

(i) 'पठति' पदे ________ लकारः अस्ति। (लट् / लृट्)

(ii) 'अभवन्' पदे ________ वचनम् अस्ति। (एक / बहु)

(iii) 'पश्यतु' पदे ________ धातुः अस्ति। (पठ् / दृश्)

(iv) 'भविष्यति' पदे ________ लकारः अस्ति। (लृट् / लोट्)

(v) 'आचार्यः' पदे ________ उपसर्गः अस्ति। (आङ् / अ)

(vi) 'उपस्थितः' पदे ________ उपसर्गः अस्ति। (उप / स्थित)

**2** **युग्ममेलनं कुरूत –** **1×6=6**

| (अ) | (ब) |
|---|---|
| (1) यथाशक्ति | (i) एकैकः |
| (2) ग्रामगतः | (ii) तत्पुरुष समासः |
| (3) नीलकण्ठः | (iii) पितुः+गृहम् |
| (4) एक+एकः | (iv) बहुव्रीहि समासः |
| (5) नास्ति | (v) न+अस्ति |
| (6) पितुर्गृहम् | (vi) अव्ययीभाव समासः |

**3** **शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत –** **1×6=6**

(1) 'कुद्धः कृषीवलः' इत्यस्मिन् पदयोः विशेष्य पदं 'कृषीवलः' अस्ति। आम

(2) 'कश्चित् कृषकः' इत्यस्मिन् पदयोः विशेषणं पदं 'कृषकः' अस्ति। न

(3) 'प्रथमः' इत्यस्य विलोमपदं 'द्वितीयः' अस्ति। आम

(4) 'अवेला' इत्यस्य विलोमपदं 'वेला' अस्ति। आम

(5) 'वनम्' इत्यस्य पदस्य पर्यायपदं 'ग्रामम्' अस्ति। न

(6) 'आम्रम्' इत्यस्य पदस्य पर्यायपदं 'रसालम्' अस्ति। आम

www.rajeshsir.co.in

**4** **एकपदेन उत्तरं लिखत –** **1×6=6**

(1) गुणी किं वेत्तिः ? गुण

(2) वसन्तस्य गुणं कः जानाति ? पिकः

(3) पशुना अपि कीदृशः गृह्यते ? उदीरितोऽर्थः

(4) 'पठितुम्' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ? तुमुन्

(5) 'दृष्ट्वा' इत्यस्मिन् पदे कः प्रत्ययः अस्ति ? क्त्वा

(6) 'वि+ज्ञा+ल्यप्' संयुज्य किम् पदं भविष्यति ? विज्ञाय

**5** उचितं विकल्पं चित्वा लिखत – **1×6=6**

(i) 'विद्यालयः' इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम् (द) अन्यवचनम्

(ii) 'छात्रा' इत्यस्मिन् पदे विभक्तिः अस्ति –

(अ) पंचमी (ब) प्रथमा

(स) षष्ठी (द) सप्तमी

(iii) 'ग्रामस्य' इत्यस्मिन् योगे विभक्तिः अस्ति –

(अ) चतुर्थी (ब) द्वितीया

(स) षष्ठी (द) सप्तमी

(iv) 'बालकम्' इत्यस्मिन् पदे विभक्तिः अस्ति –

(अ) द्वितीया (ब) प्रथमा

(स) पंचमी (द) चतुर्थी

(v) अधोलिखितेषु शब्देषु अव्ययं पदम् अस्ति –

(अ) ग्रामः (ब) सर्वत्र

(स) रमा (द) बालकम्

(vi) 'छात्रः श्वः विद्यालयं गमिष्यति' अस्मिन् वाक्ये अव्ययं पदम् अस्ति –

(अ) छात्रः (ब) श्वः

(स) विद्यालयं (द) गमिष्यति

www.rajeshsir.co.in
30626640

(प्रश्न क्रमांकः 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत–)

6 मातुः अधिका कृपा कस्मिन् भवति? 2

अथवा

केन समः बन्धुः न अस्ति?

7 काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते? 2

अथवा

वनराजः कैः दुरवस्थां प्राप्त?

8 पिता पुत्राय बाल्ये किं यच्छति? 2

अथवा

निर्धनः जनः कथं वित्तम् उपार्जितवान्?

9 केषां विस्फोटैरपि भूकम्पो जायते? 2

अथवा

कः पिपासितः म्रियते?

10 लोके महतो भयात् कः मुच्यते? 2

अथवा

रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शं कीदृशः आसीत्?

11 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वे) 1×2=2

(i) बालकः विद्यालयं गच्छति। (कर्मवाच्ये)

(ii) छात्रः पत्रम् लिखति। (कर्मवाच्ये)

(iii) गायकेन गीतं गीयते। (कर्तृवाच्ये)

www.rajeshsir.co.in

12 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – (कोऽपि द्वे) 1×2=2

(i) सुराधिपः ताम् अपृच्छत्।

(ii) सर्वे प्रकृतिमातरं प्रणमन्ति।

(iii) बुद्धिमती चपेटया पुत्रौ प्रहृतवती।

13 अधोलिखितानि वाक्यानि कः कं प्रति कथयति – (कोऽपि द्वे) 1×2=2

(i) वयस्य अपूर्वं खलु नामधेयम्। ____कः____ ____कम्____

(ii) अरे! अरे! किं जल्पसि। ____कः____ ____कम्____

(iii) नृत्यातिरिक्तं का तव विशेषता। ____कः____ ____कम्____

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य एकं सुभाषितं लिखत। 2

15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीया – (कोऽपि द्वे) 1×2=2

(i) मोहनः दुग्धेन पिबति।

(ii) नगरस्य परितः मार्गाः सन्ति।

(iii) श्री गणेशं नमः।

16 रिक्तस्थानानि पूरयत – (कोऽपि चत्वारि) $\frac{1}{2} \times 4 = 2$

(i) इदानीं वायुमण्डलं ________ प्रदूषितमस्ति। (भृशम् / कृशम्)

(ii) बकः अविचलः ________ इव तिष्ठति। (स्थितप्रज्ञः / चलः)

(iii) यत्र हरितिमा ________ शुचि पर्यावरणम्। (यत्र / तत्र)

(iv) करी च सिंहस्य बलं न ________। (मूषकः / वायसः)

(v) सर्वेषामेव महत्त्वं विद्यते ________ समयम्। (यथा / तथा)

17 अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण लिखत – $\frac{1}{2} \times 4 = 2$

(i) तत्र राजसिंहः नाम राजपुत्रः वसति स्म।

(ii) अस्ति देउलाख्यो ग्रामः।

(iii) सा एकं व्याघ्रं ददर्श।

(iv) बुद्धिमती पुत्रद्वयोपेता पितुर्गृहम् चलिता।

www.rajeshsir.co.in 30626640

18 अधोलिखितम् गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

**प्रश्नाः –**

(i) कृषकः बलीवर्दाभ्यां किं करोति स्म?

(ii) कयोः शरीरेण दुर्बलः आसीत्?

(iii) ऋषभः कुत्र पपात?

**अथवा**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं तदानीमेव किंचिद विचित्रमघटत।

**प्रश्नाः –**

(i) दैवगतिः का?

(ii) चौरः कुत्र प्रविष्टः?

(iii) अतिथिः केन प्रबुद्धः?

19 अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।
महानगरमध्ये चलदनिशं कालायसचक्रम्।

**प्रश्नाः –**

(i) अत्र जीवितं कीदृशं जातम्?

(ii) अनिशं महानगरमध्ये किं प्रचलति?

(iii) कविः किमर्थं प्रकृतेः शरणम् इच्छति?

**अथवा**

एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना॥

**प्रश्नाः –**

(i) सरसस्य शोभा केन भवति?

(ii) बकसहस्रेण कुत्र वासिना?

(iii) सरसस्य शोभा केन न भवति?


www.rajeshsir.co.in

20 अधोलिखितम् नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

रामः – भवतोर्वंशस्य कर्त्ता कः?

लवः – भगवान् सहस्रदीधितिः।

रामः – समरूपः शरीरसन्निवेशः। वयस्तु न किंचिदन्तरम्।

रामः – किं नामधेयो भवतोर्गुरुः?

लवः – ननु भगवान् वाल्मीकिः।

**प्रश्नाः –**

(i) कुशलवयोः वंशस्य कर्त्ता कः?

(ii) कुशलवयोः शरीरसन्निवेशः कीदृशः आसीत्?

(iii) कुशलवयोः गुरुः कः आसीत्?

**अथवा**

सिंहः – भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेव तुदन्ति सर्वे मिलित्वा?

एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः।।

काकः – आम् सत्यं कथितं त्वया–वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

**प्रश्नाः –**

(i) सर्वे मिलित्वा कं तुदन्ति?

(ii) रक्षकः कः भवति?

(iii) कः सत्यं कथितः?

21 अधोलिखितम् अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 4

महर्षेः दयानन्दस्य जन्म गुर्जरप्रदेशे ब्राह्मण परिवारे अभवत्। अस्य जन्मनाम मूलशङ्करः आसीत्। अयं महापुरुषः चिरोपेक्षित वेदानां प्रचारम् अकरोत्। एषः आर्यसमाजस्य स्थापनां कृतवान्। महर्षिः दयानन्दः सत्यस्य, धैर्यस्य, ब्रह्मचर्यस्य च मूर्तिः आसीत्। एतस्य चरितं सदैव भारतीयानां कृते अनुकरणीयम्।

**प्रश्नाः –**

(i) दयानन्दस्य जन्मनाम किम् आसीत्?

(ii) दयानन्दः केषां प्रचारम् अकरोत्?

(iii) महर्षिः दयानन्दः कस्य स्थापनां कृतवान्?

(iv) महर्षिः दयानन्दः कस्य मूर्तिः आसीत्?



www.rajeshsir.co.in
3062660 3062660 3062660 3062660 3062660

22 स्वप्राचार्यस्य कृते दिनद्वयस्य अवकाशार्थम् एकं प्रार्थनापत्रम् लिखत। 4

अथवा

शुल्कक्षमापनार्थं एकं प्रार्थनापत्रम् लिखत।

23 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत – 4

(i) दूरदर्शनम्

(ii) पर्यावरणम्

(iii) संस्कृतभाषायाः महत्त्वम्

(iv) कविः कालिदासः

www.rajeshsir.co.in

30626640 30626640 30626640 30626640 30626640